# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – क्रियात्मक सं. शिक्षण | **कोड –C.E.3.5.5** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – विदुरनीतिशतकम् | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधस्तनेषु श्लोकेषु द्वयोः पदच्छेदपदपरिचयपदार्थान्वय पुरःसरं व्याख्या कार्या।** १०

१ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशो बलम्॥

२ येन त्वेतानि सर्वाणि सङ्गृहीतानि भारत ।
यद् बलानां बलं श्रेष्ठं तत् प्रज्ञाबलमुच्यते॥

३ न तथेच्छन्ति कल्याणान् परेषां वेदितुं गुणान्।
यथैषां ज्ञातुमिच्छामि नैगुण्यं पापचेतसः॥

**प्रश्न २ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ “प्रशस्तानां सेवा” “मूर्खः कः” इति विषयद्वयं विदुरनीत्यनुसारं वर्णयत ।

२ “प्राज्ञैः मैत्री” “सुभाषिता वाक्” इमौ विषयौ स्वग्रन्थानुसारेण प्रतिपादनीयौ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनेषु श्लोकेषु द्वयोः पदच्छेदपदपरिचयपदार्थान्वय पुरःसरं व्याख्या कार्या।** १०

१ षडेते तु गुणाः पुंसा न हातव्याः कदाचन।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः॥

२ संभोजनं संकथनं सम्प्रीतिश्च परस्परम्।
ज्ञातिभिः सह कार्याणि न विरोधः कदाचन॥

३ शीलं प्रधानं पुरुषे तद् यस्येह प्रणश्यति।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः॥

**प्रश्न ४ अधस्तनेषु एकः विषयः वर्णनीयः।** १०

१ अतिथिसत्कारः

२ मर्यादापालकः वरः

३ आर्यशीलः सत्पुरुषः

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनेषु श्लोकेषु द्वयोः पदच्छेदपदपरिचयपदार्थान्वय पुरःसरं व्याख्या कार्या।** १०

१ वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति॥

२ चलानि हीमानि षडिन्द्रियाणि तेषां यद् यद् वर्धते यत्र यत्र ।
ततस्ततः स्त्रवते बुद्धिरस्य छिद्रोदकुम्भादिव नित्यमम्भः॥

३ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत् ॥

**प्रश्न ६ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ स्वग्रन्थानुसारेण “न किञ्चित् शाश्वतं लोके” “विषयासक्तिः नाशाय” इमौ विषयौ सोदाहरणं विवेचनीयौ।

२ “विदुरनीतेः आधुनिकयुगेऽपि छात्राणां मनसि प्रभावः” इति विषयं प्रतिपादयत।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशानां प्रश्नानाम् उत्तराणि लिखत।** १०

१ त्यागित्वं केषां गुणः?

२ “आत्मप्रशंसा” इति कस्य पदस्य अर्थः?

३ मनुष्यः कया ज्ञानं विन्दति ?

४ कैः सह मैत्रीं समाचरेत् ?

५ समृद्धिः इत्यस्य किं विलोमपदम्?

६ मूर्खः नरः कीदृशं कर्म आरभते?

७ किं न संरोहति?

८ मनुष्यः कीदृशीं वाचं त्यजेत्?

९ ‘आलस्यम्’ इति शब्दस्य विलोमशब्दः कः?

१० निरन्तरं क्रुद्ध्यति स कः कथ्यते?

११ कति जनाः नित्यदुःखिताः?

१२ पुरुषे किं प्रधानम्?

१३ धर्मः केन रक्ष्यते?

१४ क्षमा नित्यं कं हन्ति?

१५ बलेषु श्रेष्ठबलं किम्?

****************************